ISSN 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४८/३



# अनुक्रमः

१. अलिविलासिसंलापस्य उपनिषन्मूलकत्वम् ९
**रमाकान्तपाण्डेयः**
२. महिमभट्टस्य ध्वनिलक्षणपरिष्कारः – कश्चन विचारः २१
**एन.के. सुन्दरेश्वरन्**
३. कलापीय कारकविमर्शः २९
**चिरञ्जीवी अधिकारी**
४. जगत्सृष्टिनिरूपणम् ३७
**मिताली देव**
५. शान्तिपर्वणि राजधर्मः ४१
**सितांशु भूषण पण्डा**
६. पुराणेषु प्राचीनव्याकरणानुप्रयोगः ५१
**किरण आर्या**
७. वेदेषु गोर्महिमा ५७
**प्रभातकुमार सिंहः**
८. एकं सद्विप्रा बहुधा वदन्ति ६३
**पूनम सिंह**
९. अर्वाचीने संस्कृतसाहित्ये यात्रावृत्तान्तस्यानुशीलनम् ७५
**शीतलचन्द्र शर्मा**
१०. वेदोक्ताः सामाजिकसद्भावाः ८२
**शशिकुमारसिंहः**
११. संस्कृतकवीनां शरद्वर्णनम् ८७
**राहुल**

# पुराणेषु प्राचीनव्याकरणानुप्रयोगः

किरण आर्या

कस्यापि वाङ्मयस्य यथार्थज्ञानाय तस्य व्याकरणस्य ज्ञानमत्यावश्यकं भवति। वैदिककालेऽपि वेदानां अर्थानामवगमनाय तेषां मूलपाठं सुरक्षणाय च शिक्षाप्रातिशाख्यादीनां ग्रन्थानां संरचना तदानीं बभूव, शब्दानां च निर्वचन निरुक्तरूपेण साक्षागमत्। किन्तु व्याकरणस्य यत् सर्वमान्यं स्वल्पं चाद्य विद्यते तन्महर्षिपाणिनेः तपःप्रभूतफलं विद्यते। पाणिनीयव्याकरणे संस्कृतभाषायाः यावती समग्रता सूक्ष्मता च विवेचिता अस्ति न तावदन्यस्मिन् व्याकरणे सम्भवम्। निःसन्देहः व्याकरणस्य सर्वोच्चं प्रतिमानं पाणिनीय-अष्टध्यायी-व्याकरणम्।

संस्कृतवाङ्मय चतुर्दशविद्यासु पुराणविद्यायाः स्थानं प्रमुखं वर्तते। महर्षियाज्ञवल्क्यः पुराणविद्यायाः महत्त्वं प्रतिपायन् विद्यानां गणनाप्रसंगे पुराणविद्यां प्राथम्येन मनुते-

पुराणन्यायमीमांसा-धर्मशास्त्रांगमिश्रिता।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।[१]
पुराणेषु पञ्चमो वेद इति ब्रह्मानुशासनम्।[२]

पुराणेषु स्वरूपव्यापकत्वात् 'पञ्चमो वेद' अपि तत् कथ्यते। 'आत्मा पुराणं वेदानां इत्युद्घोषयमाणे स्कन्दपुराणे निगदितं यत् वेदानां ज्ञानेन सह यः कश्चित् पुराणानामध्ययनं न करोति सः न किमपि जानीते-

यो न वेद पुराणानि स वेदात्र न किंचन।
यो न वेद पुराणानि स वेदात्र न किंचन।।[3]

कतमः स हि धर्मोऽस्ति किं वा ज्ञानं तथाविधम्।।

एवं च वेदानामखिलज्ञानार्थं यथा वेदांगामध्ययनं परमावश्यकम् तथैव पुराणामपि ज्ञानस्येहार्हत्वम्। 'मुखं व्याकरणं स्मृतम्' उक्तत्वात् वेदांगेषु व्याकरणं प्रधानम्। 'प्रधाने च कृतो यत्नः फलवान् भवति'[4] अतः व्याकरणमध्येतव्यम्। 'रक्षार्थं वेदानाम् अध्येयं व्याकरणम्' वेदानां संरक्षणं व्याकरणस्यास्ति मुख्यं प्रयोजनम्, पुराणेषु च प्राचीनव्याकरणस्य अनुप्रयोगः विस्तृतया दृश्यते अतः पुराणाध्ययनेनापि प्राचीनं व्याकरणं ज्ञेयम् अतः वेदावगमनार्थं पुराणज्ञानमावश्यकम्। तत्र व्याकरणस्योल्लेखः गरुडपुराणे नारदपुराणे अग्निपुराणं च दृश्यते।

गरुडपुराणे व्याकरणस्योपदेष्टा कुमारः कार्तिकेय एवं अध्येता महर्षिकात्यायनः विद्यते। गरुडपुराणस्य पूर्वखण्डस्य २०५, २०६ अध्याये व्याकरणस्य चर्चा विद्यते-

नारदपुराणस्य पूर्वखण्डस्य ५२ अध्याये व्याकरणशास्त्रं चर्चितमस्ति, अत्र व्याकरणस्योपदेशकः महर्षिसनन्दः अध्येता महर्षिनारदः विद्यते।

अग्निपुराणे च निर्दिष्टस्य व्याकरणशास्त्रस्य प्रवचनकर्ता कुमारस्कन्दः, अध्येता महर्षि कात्यायनः अस्ति। अस्मिन् पुराणे ३४९ इत्यतः ३५९ अध्यायं यावत् एकादशाध्यायेषु व्याकरणं वर्णितमस्ति।

उपर्युक्तेषु पुराणेषु त्रिषु विषयवस्तु समानमेव। गरुडनारदपुराणयोः उपदेष्टृभेदः अवलोक्यते किन्तु प्रोक्तं व्याकरणं प्रायः सदृशमेव। भूयश्च श्लोकाः पुराणद्वये इदमित्थं प्राप्नुवन्ति, यथा-

सुप्तिङन्तं पदं ख्यातं सुपः सप्तविभक्तयः।
स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मने।।
सम्बोधने च लिङ्गादावुक्ते कर्मणि कर्तरि।
अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम्।।
अमौशसो द्वितीया स्यातत्कर्म क्रियते च यत्।
द्वितीया कर्मणि प्रोक्तान्तरान्तरेण संयुक्ते।।
टाभ्याम्भिसस्तृतीया स्यात्करणे कर्तृरीरिता।
येन क्रियते करणं तत्कर्ता यः करोति सः।।
ङेभ्यांभ्यसश्चतुर्थो स्यात्सम्प्रदाने च कारके।
यस्मै दित्सा धारयते रोचते सम्प्रदानक्तम्।
पञ्चमी स्यान्ङसिभ्यांभ्यो ह्यपादाने च कारके।
यतोपैति समादत्ते अपादते भयं यतः।।

ङसो सामश्च षष्ठी स्यात्स्वामिसम्बन्धमुख्यके।
ङ्योः सुपो वै सप्तमी स्यात्सा चाधिकरणे भवेत्।।
आधारश्चाधिकरणं रक्षाणां प्रयोगतः।
ईप्सितं चानीप्सितं यत्तदपादानकं स्मृतम्।।
पंचमी पर्य्युपाङ्योगे इतरर्तेऽन्यदिङ्मुखे।
एतैर्योगे द्वितीया स्यात्कर्मप्रवचनीयकैः।।[५]

उपर्युक्ताः श्लोकाः गरुडपुराणे तथा नारदपुराणे समानां एव पठिताः। यद्यपि अग्निपुराणोक्तव्याकरणविषयकाः श्लोकाः पुराणान्येषु न समुपलभन्ते पुनरपि तत्र वर्णाविषयं तुल्यमेवास्ति।

पुराणत्रये धातुभ्यः विहितानां तिङ्प्रत्ययानां स्वरूप भिन्नमस्ति तत्र पररमेपदस्य आत्मनेपदस्य प्रथमपुरुषस्य बहुवचने झिप्रत्ययातिरिक्तं अन्ति-अन्तप्रत्ययविधानं नारदपुराणे अग्निपुराणे दृश्यते-

तिप्तसन्तीति प्रथमोमध्यमः सिप्थस्थमोत्तमः।
मिब्वस्मसः परस्मै तु पदानां चात्मनेपदम्।।
त आतेऽन्ते प्रथमो मध्यासे आथेध्वे तथोत्तमः।
ए वहेमह आदेशा ज्ञेया ह्यन्तेध लिङ्गादिषु।।[६]
पूर्वं नव परस्मैपदं तिप्सन्तीति प्रथमः पुमान्।
त आतामन्तात्मने मुख्यः थासाथां ध्वं च मध्यमाः।।[७]

किन्तु गरुडपुरणे परस्मैपद-आत्मनेपदयोः प्रथमपुरुषस्य बहुवचने झि-झ इत्युनयोरुल्लेखः दृश्यते-

तिप्तस्झिप्रथमोमध्यः सिप्थस्थमोत्तमपुरुषः।
तातांझप्रथमोमध्यस्थासाथान्ध्वमथोत्तमः।।[८]

यद्यपि गरुडपुराणस्य अग्निपुराणस्य चोपदेष्टा एक एव कुमारस्कन्दः पुनरपि एतद्वैभिन्न्यं तत्र परिदृश्यते। तद्धितप्रत्ययान्तस्य केचन प्रयोगाः नारदपुराणे अग्निपुराणे च भिन्न-भिन्नरूपेण दृग्गोचराः भवन्ति। उदाहरणार्थ तावत्-नारदपुराणे वातशब्दात् ऊलप्रत्यये कृते, हिमशब्दाच्च चेलुप्रत्यये कृते वातूलः, हिमेलुः प्रयोगौ सिध्यतः तच्च सर्वथा पाणिनीयव्याकरणानुरूपमेव-

चिल्लश्च चिपिटं चिक्कं वातूलः कुतपस्तथा।[९]
वल्लश्च हिमेलुश्च कहोश्चोपऽस्ततः।[१०]

अग्निपुराणोक्त-कौमारव्याकरणे च वात-हिमशब्दाभ्यां क्रमशः उल-आलुच् त्ययौ विधाय वातुलः, हिमालुः शब्दयोः सिद्धिर्भवति-

रूपं वातादुपचि स्याद्वातुलश्चानपत्यके।
हिमालुरालुचि स्याच्च हिमं न सहते तथा।।[११]

अत्र अग्निपुराणापेक्षया नारदपुराणं पाणिनीयव्याकरणासन्नं दृश्यते। नारदीयपुराणप्रोक्तश्लोकाः अपि च गरुडपुराणप्रोक्तश्लोकाः पाणिनीयव्याकरणस्य सूत्राक्षरैः समानाः पर्यवदृश्यन्ते। उदाहरणार्थ तावत्-

| **पाणिनीयसूत्रम्** | **पुराणसूत्रम्** |
|---|---|
| पञ्चम्यपाङ्परिभिः[१२] | पञ्चमीपर्यपाङ्योगे[१३] |
| अभिरभागे[१४] | अभिरभागे[१५] |
| हीने[१६] | हीने[१७] |
| नमःस्वस्तिस्वाहास्वधालं-वषड्योगाच्च[१८] | नमः स्वस्तिस्वधास्वाहालंवषड्योग ईरिताः[१९] |

एवं चानेकाः श्लोकाः सन्ति पुराणयोरनयोः, ये च पाणिनीयव्याकरणमाश्रित्य रचिता इति अवभासन्ते। अनया तुलनया एततु स्पष्टमेव यत् पुराणानेषु वर्णितस्य व्याकरणस्य मूलं पाणिनीयव्याकरणमेव। तत्र च गरुडपुराणे निर्दिष्टं व्याकरणं संक्षिप्तं विद्यते। तदपेक्षया नारदीयपुराणे किञ्चित् विस्तरेण विद्यते अपि चाग्निपुराणे सर्वाधिकविस्तरेण व्याकरणस्य चर्चा व्याख्या संदृश्यते। अग्निपुराणस्य अध्यायेषु ३४९ प्रारम्भे 'अथ कौमारं व्याकरणम्' इत्युल्लेखेन ज्ञायते यदत्रोल्लिखितं व्याकरणं कौमारं व्याकरणमस्ति वक्ता चास्य कुमारस्कन्दः। श्रोता च कात्यायनः, बालानां च बोधाय तत् विद्यते। अथं कौमारव्याकरणम्, स्कन्द उवाच-

वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम्।
कात्यायननिबोधाय बालानां बोधनाय च।।[२०]

केचन विद्वांसः कौमारं व्याकरणं कातन्त्र-कालापव्याकरणस्य अपरं नाम, इत ब्रुवन्ति। पाणिनीयव्याकरणापेक्षया अल्पत्वात् कातन्त्रमिदमुच्यते। गौणरूपेण च तस्य कलापव्याकरणं नाम।

पाणिनिव्याकरणापेक्षयाऽल्पत्वेन व्याकरणस्यास्य कातन्त्रम् इति यन्नाम तत्र ईषत तन्त्रं कातन्त्रम्, ईषदर्थे कुशब्दस्य कादेशः, कात्वीषदर्थे[२१] इति। कौमारादीन्यप्यस्यैव नामानि। गौडास्तु कालापनाम्ना व्याकरणमिदं विदन्ति।[२२]

पं. युधिष्ठिरमीमांसाकस्य मतं यत् कुमारबालकानां कृते व्याकरणस्य साधारणं ज्ञानमवबोधनाय आरम्भे ग्रन्थमिदमध्याप्यते स्म अत एवास्य नाम कुमाराणामिदं कौमारम् अभवत्।[२३]

एवञ्चाग्निपुराणे सुबन्तं कारकं, तद्धितं, कृदन्तादिकमिति पाणिनीयरूपमवलोक्य

एतत्कथनं युक्तियुक्तं यत् अग्निपुराणे वर्णितं कौमारं व्याकरणं पाणिनीयव्याकरणादेव गृहीतं विद्यते।

यद्यपि पुराणस्य पञ्चलक्षणे व्याकरणस्य नाम नास्ति परं न कस्मिंश्चित् पुराणे एतदुल्लिखितं यत् पुराणेषु सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितातिरिक्तं कश्चिदन्यः विषयो न सम्मेल्य इति। व्याकरणमिति अपरा विद्या। अपरा विद्या चाग्निपुराणे वर्णितास्ति तर्हि तत्र व्याकरणं कथं हीयते। अग्निपुराणे प्रोक्तम्-

आग्नेये हि पुराणेऽस्मिन् सर्वविद्याः प्रदर्शिताः।[१७]

अनेनोल्लेखेन सर्वासु विद्यासु व्याकरणमपि स्थानं भजते अग्निपुराणे तु स्पष्टमेव व्याकरणस्योल्लेखः दृश्यते अपि च गरुडपुराणे नारदपुराणेऽपि व्याकरणस्य तत्त्वं वरीवृत्यत इत्युपरि सप्रामाणिकं निदर्शितम् अतो पुराणेषु प्राचीनव्याकरणस्यानुप्रयोगः विद्यते इति राद्धान्तम्।

**सन्दर्भाः**


१. या.स्मृ. उपाद्घाते, पृ. ३

२. तदैव १.१८

३. स्क.पु. १.१८

४. पस्पशाह्निके

५. ग.पु. २०५.२.१०। ना.पु. ५२.२.१०

६. ना.पु. ५२.१८, १९

७. अ.पु. ३५८.५, ६

८. ग.पु. २०५.१८, १९

९. ना.पु. ५२.६८

१०. ना.पु. ५२.६९

११. अ.पु. ३५६.६

१२. पा.सू. २.३.१०

१३. ना.पु. ५२.१०, ग.पु. २०५.१०

१४. पा.सू. १.४.९१

१५. ना.पु. ५२.११

१६. पा.सू. १.४.८६

१७. ना.पु. ५२.११